


# पुराणसाहित्यम् एकम् सिंहावलोकनम्

1.प्रवेशः

2.रचनाकालः 3.पुराणलक्षणम्01-0

4.पुराणसर्वेक्षणम् 5.पुराणाणि

6.उपपुराणाणि 7.उपसंहारः



# प्रस्तोता विशेषज्ञः



DR C S R LINGA REDDY
ASSISTANT PROFESSOR
DEPARTMETOF SANSKRIT
B N COLEGE , PATNA UNIVERSITY
Mob. No. 9760525164
Email – csrlr77@gmail.com



# प्रवेशः

प्राचीनभारतीयसाहित्यसम्पदि पुराणानां विशिष्टस्थानमस्ति । अपरञ्च पुराणसाहित्यं विश्वकोशरूपेण समीक्षक-शोधकर्तृषु समादृतमपि। **इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति** (महाभारते, आदिपर्वणि, 1/267-268 ) वचनात् वेदार्थज्ञाने पुराणानामतीव भूमिका विद्यते । **इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्** इति ऋचायाः व्याख्यानरूपेण वामनपुराणे वामनावतार एवोपस्थापितः, एवं ननु ? विश्वै प्रथमः भाषावैज्ञानिकः भगवान् यास्कः पुराणशब्दममुं निर्वक्ति यत् **पुरा नवं भवति** (निरुक्ते -3.19 ) इति पुराणम् । गोपथब्राह्मणे पुराण-स्मरणात् पुराणानि अतिपुराणानीति ध्वन्यते ।

# रचनाकालः

डॉ. एफ. ई. पार्टिजर-महाशयेन पुराणनिर्मितिकालः क्रीस्तुशक-नवमशताब्द्याः पश्चादेव स्यादिति प्रतिपादितम् । तत्रैव पुराणेषु अवतारविषयत्वात् तेषां रचनाकालः नवमशताब्द्याः पश्चादेव स्यादिति सुपुष्टप्रमाणैः तर्कयति डॉ. हाजरा-महाभागः । परं भगवद्व्यास-तच्छिष्य-प्रशिष्यादिभिः सूत-शौनक-वैशम्पायन-प्रभृतिभिः पुराणानि परम्परया अनादिकालाधिगतानि नूतनरीत्या अनेकाख्यानोपाख्यान-कथा-गाथा-प्रसङ्गवर्धनेन प्रकाशितानीति नात्र अपोह-लवलेशः विद्यते किञ्चित्।परं पुराणेषु रामायण-महाभारतादीनां प्रचुरवर्णनत्वात् , क्रीस्तुपूर्ववर्तिकाले अवतारवादस्य नोदयत्वाच्च क्रीस्तुपूर्ववर्तिनः न स्युः पुराणानीति निष्कर्षः। उतवा पश्चवर्तिकाले तेषां स्वरूपे महत् परिवर्तनं केषाञ्चिन् मतान्धैः विहितं स्यात् स्वार्थवशेन ।

# पुराणलक्षणम् - 01

पुराणेषु सामान्यतः पञ्चविषयाणां वर्णनमुपलभ्यते । तत्र 1.संसारस्य सृष्टिः 2.प्रलयानन्तरसृष्टिः 3.राज्ञां ऋषीणां च वंशवर्णनम् 4.मन्वन्तराणि = संसारस्य कालविभागः , प्रत्येककाले समुपजातघटनानां वर्णनम् 5. वंशानुचरितम् = राज्ञामनन्तरवर्तिनां कलियुगीयप्रतापिराज्ञां वर्णनम्।तथा हि-

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।

वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ।।(मार्कण्डेयपुराणे , 134.13 )

तत्रैव भागवतपुराणे ब्रह्मवैवर्तपुराणे चोक्तं यदुपपुराणेषु एतत्पञ्चलक्षणमन्वितं स्यात् , किन्तु पुराणानां दशलक्षणाणि विधेयानीति। तथाहि –

# पुराणलक्षणम् - 02

**सर्गश्चाथ विसर्गश्च वृत्ती रक्षान्तराणि च ।**
**वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ।।**

परमवतारविषये अग्निपुराणे पूर्वोक्त-पञ्चलक्षणानन्तरमधिक-मच्यते – **मत्स्यकूर्मादिरूपधृक्** (1.14 ) इति । अतः अवतारविषयः अपि प्रधानविषयः वर्तते पुराणानाम्। एकत्र भगवान् रोमहर्षणः सूतः पुराणलक्षणविषये पञ्च-लक्षणानन्तरम् आह – **पुण्या दिव्या प्रासङ्गिकी कथा** इति , तस्माद् ध्वनितञ्चैतत् यत्पुराणानाम् कथा-आख्यान-आख्यायिका-गाथादयः अपि प्रसक्तानुप्रसक्तविषयाः भवन्तीति।

# पुराणसर्वेक्षणम्

प्राचीनकालतः एव निर्विवादरूपेण पुराणानां संख्या अष्टादश इति परम्परया बोध्यते । देवीभागवते (1.3.21) आदयक्षर-माध्यमेन अष्टादशपुराणानां परिगणनमत्र श्लोके दृश्यते –

**म-द्वयं भ-द्वयञ्चैव ब्र-त्रयं व-चतुष्टयम् ।**
**अ-ना-प-लिङ्-ग-कू-स्कानि पुराणानि पृथक् पृथक् ।।**

म-द्वयम् = मार्कण्डेयपुराणम् , मत्स्यपुराणम् ।

भ-द्वयम् = भागवतपुराणम् , भविष्यपुराणम् ।

ब्र-त्रयम् = ब्रह्म-ब्रह्माण्ड-ब्रह्मवैवर्त-पुराणानि ।

व-चतुष्टयम् = विष्णु-वामन-वाराह-वायु-पुराणानि। अ = अग्निपुराणम्, ना = नारदीयपुराणम् , प = पद्मपुराणम् , लिङ् = लिङ्गपुराणम् ,ग = गरुडपुराणम् , कू = कूर्मपुराणम् , स्क = स्कन्दपुराणम् । कुत्रचित् परिगणनेषु वायुपुराणस्य स्थाने शिवपुराणमुपलभ्यते।

# पुराणानि

भागवतपुराणे अष्टादशपुराणानां यद्विवरणमुपलभ्यते , तत्साारण्यामत्र प्रदर्श्यते .......

| क्रमसंख्या | पुराणनाम | श्लोकसंख्या | क्रमसंख्या | पुराणनाम | श्लोकसंख्या |
|---|---|---|---|---|---|
| 1 | मार्कण्डेयपुराणम् | 25000 | 10 | वाराहपुराणम् | 24000 |
| 2 | मत्स्यपुराणम् | 14000 | 11 | वायुपुराणम् | 24000 |
| 3 | भागवतपुराणम् | 18000 | 12 | अग्निपुराणम् | 10500 |
| 4 | भविष्यपुराणम् | 14500 | 13 | नारदीयपुराणम् | 25000 |
| 5 | ब्रह्मपुराणम् | 10000 | 14 | पद्मपुराणम् | 55000 |
| 6 | ब्रह्माण्डपुराणम् | 12000 | 15 | लिङ्गपुराणम् | 11000 |
| 7 | ब्रह्मवैवर्तपुराणम् | 18000 | 16 | गरुडपुराणम् | 19000 |
| 8 | विष्णुपुराणम् | 23000 | 17 | कूर्मपुराणम् | 17000 |
| 9 | वामनपुराणम् | 10000 | 18 | स्कन्दपुराणम् | 81000 |

# उपपुराणानि

उपपुराणान्यपि अष्टादश सन्तीति परम्परया बोध्यते। परं तेषां नाम्नां संख्याविषये च विपुलं वैविध्यमुपलभ्यते। विद्वांसः उपपुराणानां निम्ननामानि परम्परया प्रदिशन्ति ---

| क्रमसंख्या | उपपुराणस्य नाम | क्रमसंख्या | उपपुराणस्य नाम | क्रमसंख्या | उपपुराणस्य नाम |
|---|---|---|---|---|---|
| 1 | विष्णुधर्मपुराणम् | 7 | कालिकापुराणम् | 13 | शाम्बपुराणम् |
| 2 | विष्णुधर्मोत्तरपुराणम् | 8 | देवीभागवतपुराणम् | 14 | गणेशपुराण |
| 3 | नृसिंहपुराणम् | 9 | महाभागवतम् | 15 | मुद्गलपुराण |
| 4 | बृहन्नारदीयपुराणम् | 10 | शिवपुराणम् | 16 | भविष्योत्तरपुराणम् |
| 5 | क्रियायोगसारपुराणम् | 11 | शिवरहस्यपुराणम् | 17 | बृहद्धर्मपुराण् |
| 6 | देवीपुराणम् | 12 | एकाम्रपुराणम् | 18 | भार्गवपुराणम् |

# उपसंहारः

पुराणानाम् ऐतिहासिकं सांस्कृतिकञ्च महत्त्वं सुमहद् विद्यते। प्राचीनभारतस्य राजनैतिक-सांस्कृतिक-भौगोलिक-ज्ञानार्थं पुराणान्येव आधारदर्पणानि। प्रसिद्धः वैदेशिकः पुराणवेत्ता डॉ.पार्टिजर-महाशयेन पुराणानां गम्भीर-शोधानुशीलनेन भारतीय-राजवंशानां सूचयः प्रस्तुतीकृताः सन्ति । यैषां साहाय्येन पुराणानाम् ऐतिहासिकं महत्त्वमधिगम्यते । प्राचीनभारतस्य व्यापकं सांस्कृतिकं चित्रं पुराणेष्वधिगम्यते। भारतीयजनमानसस्य धार्मिक-विश्वासानाम् आकराणि मूलानि च सन्ति पुराणानि। विष्णुः, महेश्वरः, दुर्गा , गणेशः ---- इत्यादीनां देवतानामुपासनायाः आधाराणि पुराणानि। व्रतानां पूजा-पाठ-पद्धतेश्च महत्त्वं यथास्थानमत्र पुराणेषु उपदिष्टमस्ति । पुराणेषु आख्यानोपाख्यानमाध्यमेन आचार-व्यवहाराणामतीवोत्तमोत्तमशिक्षणं समुपदिष्टमस्ति। कर्माकर्मप्रवृत्तिनिवृत्त्युपदेशद्वारा कर्तव्याकर्तव्यस्य सूपदेशेन वा पुराणानां लोकशिक्षणे महत्त्वपूर्णं योगदानं वरीवर्तीति निष्कर्षः ।।



धन्यवादाः

शिवास्ते सन्तु पन्थानः
विदुषां वशंवदः
डॉ.सी. एस. आर. लिङ्गा रेड्डी